শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ব্রহ্মদের কৃতং

॥ শ্রী সৌলভ্যচূডামণিস্তোত্রম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী সৌলভ্যচূডামণিস্তোত্রম্ ॥

ব্রহ্মোৱাচ
চক্রাম্ভোজে সমাসীনং চক্রাদ্যাযুধধারিণম্।
চক্ররূপং মহাৱিষ্ণুং চক্রমন্ত্রেণ চিন্তযেৎ॥ **1** ॥

সর্ৱাৱযৱসংপূর্ণং ভযস্যাপি ভযঙ্করম্।
উগ্রং ত্রিনেত্রং কেশাগ্নিং জ্ৱালামালাসমাকুলম্॥ **2** ॥

অপ্রমেযমনির্দেশ্যং ব্রহ্মাণ্ডৱ্যাপ্তৱিগ্রহম্।
অষ্টাযুধপরীৱারম্ অষ্টাপদসমদ্যুতিম্॥ **3** ॥

অষ্টারচক্রমত্যুগ্রং সংৱর্তাগ্নিসমপ্রভম্।
দক্ষিণৈর্বাহুভিশ্চক্রমুসলাঙ্কুশপত্রিণঃ॥ **4** ॥

দধানং ৱামতশ্শঙ্খচাপপাশগদাধরম্।
রক্তাম্বরধরং দেৱং রক্তমাল্যোপশোভিতম্॥ **5** ॥

রক্তচন্দনলিপ্তাঙ্গং রক্তৱর্ণমিৱাম্বুদম্।
শ্রীৱৎসকৌস্তুভোরস্কং দীপ্তকুণ্ডলধারিণম্॥ **6** ॥

হারকেযূরকটকশৃঙ্খলাদ্যৈরলঙ্কৃতম্।
দুষ্টনিগ্রহকর্তারং শিষ্টানুগ্রহকারিণম্॥ **7** ॥

এৱং সৌদর্শনং নিত্যং পুরুষং হৃদি ভাৱযেৎ।
সৌলভ্যচূডামণ্যাখ্যং মযা ভক্ত্যা সমীরিতম্॥ **8** ॥

চূডাযুক্তং ত্রিসন্ধ্যাযাং যঃ পঠেৎস্তোত্রমুত্তমম্।
ভযং চ ন ভৱেত্তস্য দুরিতং চ কদাচন॥ **9**॥

জলে ৱাঽপি স্থলে ৱাঽপি চোরদুঃখমহাপদি।
সঙগ্রামে রাজসংমর্দে শক্রভিঃ পরিপীডিতে॥ **10**॥

বন্ধনে নিগলে ৱাঽপি সঙ্কটেঽপি মহাভযে।
যঃ পঠেৎপরযা ভক্ত্যা স্তোত্রমেতজ্জিতেন্দ্রিযঃ।
সর্ৱত্র চ সুখী ভূৎৱা সর্ৱান্ কামানৱাপ্নুযাৎ॥ **11**॥

॥ শ্রী সৌলভ্যচূডামণিস্তোত্রং সমাপ্তম্॥